**रुट** दीप्तौ अक० प्रतिघाते सक० च भ्वा० आ० सेट् । रोटते लृदित् लुङि उभ० अरुटत् अरोटिष्ट रुरुटे ।

**रुठ** उपघाते भ्वा०पर०सक०सेट् । रोठति अरोठीत् ।

**रुठ** प्रतीघाते भ्वा० आ० सक० सेट् । रोठते लृदित् लुङि उभ० अरुठत् अरोठिष्ट रुरुठे ।

**रुठ** गतौ चौर्य्ये सक० मन्दीभावे खञ्जीभावे च अक० भ्वा० पर०सेट् इदित् । रुण्ठति अरुण्ठीत् । [कबन्धे जटा० ।

**रुण्ड** पु० रुटि–अच् पृषो० ठस्य डः । १मूर्द्धशून्यदेहे

**रुत** न० रु–क्त । रवे पशुपक्षिप्रभृतीनां शब्दे अमरः ।

**रुद** रोदने अश्रुविमोचने अदा० पर० अक० सेट् रुदा०सार्व-धातुके हलादौ इट् रोदिति इरित् अरुदत् अरोदीत् ।

**रुदादि** पु० सार्वधातुके हलादौ इड्निमित्ते शब्दगणे स च गणः "रोदितिः स्वपितिश्चैव श्वसितिः प्राणितिस्तथा । जक्षितिश्चैव विज्ञेयो रुदादिः पञ्चको गणः" ।

**रुदन्ति(न्ती)का** स्त्री रुद–झच् गौरा०ङीष् । संज्ञायां कन् वा । क्षुद्रक्षुपभेदे राजनि० "चणपत्रसमं पत्रं क्षुपश्चैव तथाकृतिः । शैशिरे जलबिन्दूनां स्रवन्तीति रुदन्तिका । रुदन्ती वह्निकृद्दुष्ट्या पित्तघ्नी च रसायनी" राजव० ।

**रुदित** न० रुद–भावे क्त । १क्रन्दने अमरः । कर्त्तरि क्त । २कृतरोदने त्रि० ।

**रुद्ध** त्रि० रुध–क्त । आवरणादिना वेष्टिते अमरः २कृतगति-[रोधे च ।

**रुद्र** पु० रोदिति रुद–रक् । १शिवमूर्त्तिभेदे "सोऽरोदीत् यद-रोदीत् तत् रुद्रस्य रुद्रत्वम्" श्रुत्युक्ते २वह्नौ च । "अजैक-पादहिर्बुध्नो विरूपाक्षः सुरेश्वरः । जयन्तो बहुरूपश्च त्र्यम्बकोऽप्यपराजितः । वैवस्वतश्च सावित्रो हरो रुद्रा इति स्मृताः" ३इत्युक्तेषु एकादशसु शिवमूर्त्तिभेदेषु व०ब० यजु०१६अ०उक्तेषु "नमस्ते ! रुद्र मन्यवे" इत्यादिषु ४रुद्र-गणेषु च । ५एकादशसंख्यायाम् ६आर्द्रानक्षत्रे च ।

**रुद्रचण्डी** स्त्री रुद्रयामलोक्ते देवीमाहात्म्यप्रतिपादकग्रन्थे

**रुद्रज** पु० रुद्रात् जायते जन–ड । १शिववीर्य्यजाते पारदे राजनि० २कार्त्तिकादौ च ।

**रुद्रजटा** स्त्री रुद्रस्य जटेव पिङ्गत्वात् जटिलत्वाच्च । १स्व-नामख्याते लताभेदे राजनि० "कटू रुद्रजटा श्वासकास-हृद्रोगनाशिनी । भूतरक्षोनाशिनी च" रुद्रलताप्यत्र ।

**रुद्रपत्नी** स्त्री ६त० । १दुर्गायाम् २अतस्याञ्च (मसिना) रत्नमा० ।

**रुद्रप्रिया** स्त्री ६त० १हरीतक्याम् २दुर्गायाञ्च शब्दर० ।

**रुद्रविंशति** स्त्री रुद्रस्वामिका विंशतिः । प्रभवादिषु षष्टिवत्-सरेषु अन्तिमेषु विंशतिवर्षेषु । प्रभवादिशब्दे ४४७३ पृ० दृश्यम् ।

**रुद्रसावर्णि** पु० चतुर्दशसु मनुषु द्वादशे मनौ मार्कं० पु० ।

**रुद्राक्रीड** न० रुद्रस्याक्रीडा यत्र । श्मशाने त्रिका० ।

**रुद्राक्ष** पु० रुद्रस्याक्षि कारणत्वेनास्त्यस्य अच । स्वनामख्याते वृक्षे तन्माहात्म्यादि नि०सि० उक्तं यथा

लैङ्गे "विना भस्मत्रिपुण्ड्रेण विना रुद्राक्ष-मालया । पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः । तस्मान्मृदापि कर्त्तव्यं ललाटे वै त्रिपुण्ड्रकम्" रुद्राक्ष-विशेषाः शिवरहस्ये "एकवक्त्रः, शिवः साक्षाद् ब्रह्म-हत्यां व्यपोहति । अवध्यत्वं प्रतिस्रोतो वह्निस्तम्भं करोति च । द्विवक्त्रो२ हरगौरी स्याद्गोवधाद्यघनाश-कृत् । त्रिवक्त्रो३ ह्यग्निजन्माथ पापराशिं प्रणाशयेत् । चतुर्वक्त्रः४ स्वयं ब्रह्मा नरहत्यां व्यपोहति । पञ्चवक्त्र५स्तु कालाग्निरगम्याभक्ष्यपापनुत् । षड्वक्त्र६स्तु गुहो ज्ञेयो भ्रूणहत्यादि नाशयेत् । सप्तवक्त्र७स्त्वनन्तः स्यात् स्वर्ण-स्तेयादिपापहृत् । विनायकोऽष्टवक्त्रः८ स्यात् सर्वानृत-विनाशकृत् । भैरवो नववक्त्र९स्तु शिवसायुज्यकारकः । दशवक्त्रः१० स्मृतो विष्णुर्भूतप्रेतभयापहः । एकादशमुखो ११रुद्रो नानायज्ञफलप्रदः । द्वादशास्य१२स्तथादित्यः सर्वरोगनिबर्हणः । त्रयोदशमुखः१३ कामः सर्वकाम फलप्रदः । चतुर्दशास्यः१४ श्रीकण्ठो वंशोद्धारकरः परः" इति । तथा "विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः । स याति नरकान् घोरान् यावदिन्द्राश्चतु-र्दश । पञ्चामृतं पञ्चगव्यं स्नानकाले प्रयोजयेत् । रु-द्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा । त्र्यम्ब-कादिमन्त्रं च तथा तत्र प्रयोजयेत्" तथा "अष्टोत्तरशतं धार्य्यं चतुःपञ्चाशदेव वा । सप्तविंशतिमाला वा ततो हीनाधमा स्मृता" । प्रजापतिः "मोक्षार्थी पञ्चविंशत्या धनार्थी त्रिंशता जपेत् । पुष्ट्यर्थी पञ्चत्रिंशत्या पञ्च-दशत्राभिचारके । सप्तविंशतिरुद्राक्षमालया देहसं-स्थया । यत् करोति नरः पुण्यं सर्वं कोटिगुणं भवेत् । यो ददाति द्विजेभ्यश्च रुद्राक्षं भुवि सम्मुखम् । तस्य प्रीतो भवेद्रुद्रः स्वपदं च प्रयच्छति" । पदार्थादर्शे वोपदेवः "रुद्राक्षान् कण्ठदेशे दशन३२परिमितान् मस्तके विंशती द्वे ४० षट् षट् कर्णप्रदेशे करयुगलकृता द्वादशद्वादशैव । बाह्वोरिन्दोः१६कलाभिर्नयनयुगकृतयुगं त्वेकमेकं शिखायां वक्षस्यष्टाधिकं यः कलयति शतकं सः स्वयं नीलकण्ठः" ।